**कलकूट** पु० नगरभेदे राजनि० । ततः भवार्थे तद्राजार्थे च "साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्" पा० इञ् । कालकूटि तद्भवे त्रि० तन्नृपे च । इञश्चास्त्रियां बहुषु लुक् । कलकूटास्तद्देशवासिषु तन्नृपेषु च स्त्रियां तु न लुक् । कालकूट्य इत्येव ।

**कलघोष** पुंस्त्री कलो घोषोऽस्य । कोकिले शब्दर० स्त्रियां [जातित्वात् ङीष्

**कलङ्क** पु० कलयति क्विप् कल् चासौ अङ्कश्चेति, कं ब्रह्माणमपि लङ्घयति गच्छति लकि—गतौ अण् वा । १चिह्ने २अपवादे, ताम्रादिधातूनां ३मलभेदे (कलङ्कान), ताम्रादियोगात् ४अस्त्रादेर्विकारे च मेदि० । "शशकपाणकवचेषु कलङ्काः" काद० । "धारानिबद्धेव कलङ्करेखा" "मत्तः सदाचारशुचेः कलङ्कः" रघुः । "ताम्रवर्णश्च परुषो मन्दरश्मिर्दिवाकरः । अदृश्यत कलङ्काङ्कः संसक्तो धूमकेतुना" रामा० । ततः अस्त्यर्थे इनि । कलङ्किन् तद्युक्ते त्रि० स्त्रियां ङीप् । "कलङ्की जायते विल्वे" ति० त० स्मृतिः । ततः तारका० जातार्थे इतच् । कलङ्कित जातकलङ्के त्रि० ।

**कलङ्कष** पुंस्त्री करेण कषति बा० खच् मुम् च रस्य लः । १सिंहे शब्दमा० । जातित्वात् स्त्रियां ङीष् । २करताल्यां स्त्री शब्दरत्ना० टाप् ।

**कलङ्कुर** पु० कं जलं लङ्कयति लकि—गतौ णिच—उरच् । जलानामावर्त्ते स्वतोजलभ्रमे त्रिका० ।

**कलञ्ज** पु० केतिशब्दं लञ्जति भाषते क इत्यव्यक्तानुकरणम् लजि-अण् । विषाक्तास्त्रेण हते १मृगे, २पक्षिणि च । ३तन्मांसे न० "न कलञ्जं भक्षयेदिति" श्रुतिः । ४ताम्रकूटे च (तामाक) "कलञ्जस्य वेष्टनधूमपानात् स्याद्दन्तशुद्धिर्मुखरोगहानिरिति" वैद्यके तत्सेवनात् मुखरोगहान्यादि उक्तम् । ५परिमाणभेदे च । कर्षशब्दे भावप्र० तन्मानभेदो दृश्यः ।

**कलञ्जाधिकरण** न० "न कलञ्जं भक्षयेदित्यादिवाक्यमधिकृत्य पञ्चावयवन्यायभेदे स च न्यायः यथा किं यदा कदापि तद्भक्षणनिषेधः । उत सर्वदेति संशयः । यदा कदाचिन्निषेध इति पूर्वपक्षः सर्वदा तन्निषेध इति सिद्धान्तः । तदेतत् भङ्ग्या एका० त० दर्शितं यथा "न कलञ्जं भक्षयेत्" इति श्रुतिः कलञ्जभक्षणाभावविषयकं कार्य्यमित्यर्थः । तत्र कालविशेषानुपादानान्निषिध्यमानक्रियायां प्रवृत्तिमतो निषेधविधावधिकारादयावत्कालमेव तस्यां तस्य निवृत्तिः । न हि कलञ्जभक्षणादयतः कुतश्चित् कारणान्निवृत्तस्य निषेधानुपालनं सकृद्वृत्तमिति कलञ्जभक्षणनिषेधो न पुनस्तं निवर्त्तयति किन्तु भक्षणप्रवृत्तिमत्तामात्रमधिकारिविशेषणं यदा यदा भवति तदा तदैव निषेधविधिरपि तं निवर्त्तयति । न हि कलञ्जस्य भक्षणमुपक्रम्य यावत् कालं तद्भक्षयति । अतस्तदितरकाले निवृत्तिः सिद्धैवेति भवति विफलो विधिः । ननु नासौ निवृत्तिरप्रवृत्तस्य निवृत्त्यनुपपत्तेः । सत्यं, प्रवृत्त्युपाधिना विनाशं प्राप्स्यन् प्रागभाव एव प्रवृत्तिनिराकरणात् साध्यमानो निवृत्तिरुच्यते न तु प्रवृत्तिरपि साध्यतयोपदिश्यते किन्तु रागप्राप्तप्रवृत्तिमत एव निषेधविधावधिकारः । यत्तु "मनसा तु प्रवृत्तस्य भूतचेष्टावतोऽपि वा । यदनागतभावस्य वर्ज्जनं तन्निवर्त्तनम्" इति । अत्रापिशब्देनाप्रवृत्तमात्रसमुच्चयान्न विरोधः । भूतचेष्टावत इति । "भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीवं त्रिषूचिते । प्राप्ते वृत्ते समे सत्ये देवयोन्यन्तरे तु ना" इति मेदिन्युक्तेः भूते प्राप्ते निषेध्ये चेष्टावत इत्यर्थः । ततश्च प्रागभाव एव कालान्तरसम्बन्धितया साध्यत्वेनोपदिश्यते । प्रागभावश्चानादिसंसर्गाभावमात्रपरः सचाप्रवृत्तस्य भक्षणकारणमननुतिष्ठतः सिध्यत्येव । तस्मात् सकृत्क्रियापर्य्यवसायित्वे विफलो विधिः । कादाचित्काकरणस्य निषेधमन्तरेणापि प्राप्तेः । न च स्वर्गकामादिवत् साध्यतया प्रवृत्तिमत्कर्त्तृकत्वमप्यङ्गं विषयमात्रानुष्ठानाधीनसिद्धत्वान्निषेधनियोगानामितिकर्त्तव्यताकाङ्क्षाविरहात् अत एव शुचित्वमपि तत्र नाङ्गम् । तस्मान्निषेधविधिषु काकवन्तो देवदत्तस्य गृहा इत्यादिवत्तटस्थत्वेनाधिकारिविशेषणीभूतायाः प्रवृत्तेर्यावत्कालमनुवृत्तिस्तावत्कालमेव निवृत्तौ साफल्यं पुनर्निमित्तान्तरवन्न सकृदनुष्ठानेनैव शास्त्रार्थसिद्धिः"।

यथा चात्र निवृत्तेरेव बोध्यता न प्रवृत्त्यभावस्य तथा समर्थितं वृहदारण्यकब्राह्मणभाष्ययोः यथा—

"प्रतिषिद्धानिष्टफलसम्बन्धश्च वेदादेव विज्ञायते न चानुष्ठेयः सः । न च प्रतिषिद्धविषये प्रवृत्तक्रियस्याकरणादन्यदनुष्ठेयमस्ति । अकर्त्तव्यताज्ञाननिष्ठतैव हि परमार्थतः प्रतिषेधविधीनां स्यात् । क्षुधार्त्तस्य प्रतिषेधज्ञानसंस्कृतस्याभक्ष्येऽभोज्ये वा प्रत्युपस्थिते कलञ्जाभिशस्तान्नादाविदं भक्ष्यमदो भोज्यमिति वा ज्ञानमुत्पन्नं तद्विषयया प्रतिषेधज्ञानस्मृत्या बाध्यते मृगतृष्णिकायामिव